National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2019; 1(25): 119-122
© 2019 NJHSR
www.sanskritarticle.com

**Dr. P.T.G. Ranga Ramanujachyulu**
Assistant Professor,
Department of Agama,
National Sanskrit University
Tirupati- 517507

**Correspondence:**
**Dr. P.T.G. Ranga Ramanujachyulu**
Assistant Professor,
Department of Agama,
National Sanskrit University
Tirupati- 517507

# श्रीरामकृष्णविवेकानन्दयोः दृष्ट्या ईश्वरतत्त्वम्

**Dr. P.T.G. Ranga Ramanujachyulu**

**स्वामिविवेकानन्दमहाशयः पश्चिमबङ्गालराज्ये शिम्लाप्रान्ते सुप्रसिद्धपण्डितवंशे दत्तवंशे क्री.श.त्रिषष्ठ्युत्तराष्टादशशततमे वर्षे (१८६३) जान्युवरिमासे १२दिनांके श्रीविश्वनाथ दत्तभुवनेश्वरीदेव्योः पुत्ररूपेणजनिमलभत।** पिता विश्वनाथदत्तः संस्कृताङ्ग्लपारशीकभाषासु व्युत्पन्नः महान् पण्डितश्च। सः बाल्ये नरेन्द्र इति व्यवहृतः। बाल्यादेव मातुः भुवनेश्वर्याः सन्निधौ श्रीमद्रामाणमहाभारतादिपौराणिककथाश्रवणेन भगवद्भक्तिः नरेन्द्रस्याङ्कुरिता एवं विरामसमये सर्वदा ध्यानपरो आसीत्। कौमारे भग्वतः श्रीरामचन्द्रस्य श्रीकृष्णस्य विभिन्न कथानां श्रवणेन मनसि प्रगाढपारमार्थिकोद्रिक्तभावना उदिता इह लोको वैराग्यभावाना एधिता च। तदनु परिव्राजकानां विषये श्रद्धा अधिका जाता। अतः ये तस्य गृहं यान्ति तेभ्यः गृहे यथात्तरीत्या विभिन्नानि वस्तूनि दानमकरोत्। नरेन्द्रस्य मेधाशक्तिः निरुपमा। न केवलं रामायणमहाभारतादिषुपद्यानि व्याकरणसूत्राणि च कण्ठस्थीभूताः नरेन्द्रस्य। सः सर्वदा दिने व्यायामदण्डविद्याशास्त्रविनोदकार्यक्रमेषु रतो भवति एवं रात्रिवेलायां तत्रापि विशेषता मध्यरात्रौ एवं ब्राह्मीमुहूर्ते च सदा ध्यानपरो बभूव। अनेन तस्यालौकिका बुद्धिः निरुपमानमेधाशक्तिः एवञ्च पारमार्थिकभावनाविशेषाश्च समजनयन्।

विवेकानन्दस्य वयः एधमाने सति चित्तवृत्तिः परिवर्तितः। वैज्ञानिकप्रावीण्यम्, विभिन्न - शास्त्रीयग्रन्थानां पठने रचिः, नैकविधानां दार्शिनिकवैज्ञानिकपत्रिकानां समालोचनम्, महातां विदुषां प्रसङ्गानां श्रवणे रुचिः इत्याद्याः अलौकिकभावनाः संवर्धिताः। एतेषामव - लम्बनेन नरेन्द्रस्य बुद्धौप्रकृष्टः वादप्रतिवादनरूपोपन्यासशक्तिरभिवृद्धः। पितुः विश्वानाथेन सह बहुषु पट्टणेषु नगरेषु च सञ्चारेण संस्कृतहिन्द्याङ्ग्लपारशीकबङ्गाल मराठीगुजरात्यादिनैकासु भाषासु प्रवीण्यमवाप श्रीविवेकानन्दमहाशयः। अयमेको आश्चर्यविषयः यत्तस्य मनसि सन्यासाश्रमस्वीकाराभिलाषा निगूढा विद्यते। हेतुनानेन वैवाहिकसम्बन्धविषये मातापितरौ यत्नः क्रियमाणेऽपि दैवनिर्णयानुसारमवरोधाः सम्भाव्यन्तो आसन्।

विवेकानन्दस्य परमादरणीयेन श्रीरामकृष्णपरहंसमहोदयेन प्रथमः समागमः ब्रह्मसमाज - संस्थया सञ्जातः। सः ब्राह्मसाक्षात्कारजिगीषया पीडितः महर्षिः देवेन्द्रनाथठाकूरादिमहर्षीन् पप्रच्छ। किन्ते न कोऽपि तस्य योग्यभूतमुत्तरं नैव दद्यात्। एकदा कलकत्तानगरस्य प्राच्यां दिशि दक्षिणेश्वरमिति पट्टणे श्रीरामकृष्णपरमहंसः महान् योगी विरराज। सः भगवत्याः कालीदेव्याः प्रत्यक्षसाक्षात्कारसिद्धसाधक इति ज्ञात्वा तमनुजगम श्रीविवेकानन्दः। महर्षिः निरन्तरब्राह्मानुभवे

मग्नः। निरन्तरैकान्तिकप्रगाढसाधनेन कालीदेव्याः साक्षात्कारं लब्ध्वा नैकविधानां मनतानां साधनानि वधास्य ब्राह्लोकसंस्पृष्टो सम्बभूव। श्रीरामकृष्णस्य सन्निधिमेत्य विवेकानन्द अलौकिकानन्दमनुभूतवान्। महर्षिसन्निधौ भक्तिगीतालापने सन्तुष्टः रामकृष्णः गाढसमाधिसंलग्नो बभूव। श्रीरामकृष्णं प्रति विवेकानन्दः भगवद्दर्शनविषये हे **स्वामि किं भवान्भगवन्तं प्रत्यक्षेणानुभूतो वा इति पृष्टे सति श्रीरामकृष्णः दृष्टवानिति समाधत्त।** तदनु श्रीविवेकानन्दः रामकृष्णपरमहंसस्य परमादरणीयः अत्यन्तप्रीतिपात्रो दास आसीत्। ब्राह्ज्ञानपिपासया विवेकानन्दः श्रीरामकृष्णस्याश्रमे अधिकाधिकं समयः न्यवसन्। **१८८४तमे वर्षे श्रीरामकृष्णपरमहंसः विवेकानन्दादिभिस्सह सम्भाषणसन्दर्भे वैष्णवमत -प्रस्तावः कृतः।** तदा गौराङ्गदेवसन्देशं श्रावयन् श्रीरामकृष्णः इत्थमवोचत्- **सम्प्रदाये भगवन्नामानुसन्धानम्, भगवद्भक्तेषु रुचिः, सर्वभूतानुकम्पा, गुरुशुश्रूषा एवं सर्वसत्यत्वनिरूपणमिति पञ्चविषयाः प्रधानतमा इति। किन्तु एतेषां विषयाणां तत्त्वं केवलं विवेकानन्दस्यैव लब्धम्।** अत एव सः सर्वदा गुरुं श्रीरामकृष्णपरमहंसं पादसेवायामेव रतो बभूव। एतेषां पञ्चानामवगमनेन विवेकानन्दस्य भक्तिज्ञानयोः सम्यगवगमयत। १८८५ तमे वर्षे श्रीरामकृष्णस्य कण्ठे व्रणमजनयत्। तस्य चिकित्सार्थं किञ्चित्कारलं दक्षिणेस्वरस्य दक्षिणेस्वरस्य ४ ख़ुदीरे श्यामार्पकूरपुरे काशीपुरे चागमत्। तेन व्रणेन पीडितोऽपि रामकृष्णेनाश्रिताय विवेकानन्दाय भगवत्साक्षात्कारार्थमावश्य-कानां साधनानुद्दिश्याम्नातम्। विवेकानन्दः गुरोः शुश्रूषायै गृहे विद्यमानां भाक्तानां सेवां चकार। गुरोः सकाशादेव नैकानां पारमार्थिकानुभवः प्राप्य साधकोऽभवत्।शिष्यकोटिं प्रति विवेकानन्दं भाविनायकत्वेन संकल्प्य तदर्थमपेक्षितानां विषयाणामप्यनुजगृः।

विवेकानन्दस्यात्यन्तिकीसाक्षात्कारतृष्णशान्त्यर्थं श्रीरामकृष्णः तस्मै निर्वकल्पमाध्यनुभूतिमनुजग्राह। **१८८६ तमे वर्षे आगस्तमासे 16दिनाङ्के भगवान् श्रीरामकृष्ण परमहंसमहर्षिः शिष्यकोटिं विवेकानन्दश्च परित्यज्य महासमाधिं प्राप।** तदनु स्वामी विवेकानन्दः आचार्यस्य श्रीरामकृष्णपरमहंसस्य नैकविधानां सिद्धान्तां विश्वमानव -कल्याणायोपदेशार्थं भारते समग्रविश्वे च श्रीरामकृष्णमठानि संस्थानामुपस्थापयामास। तैः श्रीविवेकानन्दः भगवान् रामकृष्णस्याशनामुपदेशानाञ्च लोकविदितं चकार। परमतत्त्वोपदेश -प्रचारजिगिषया विशालविश्वे विभिन्नेषु देशेषु नैकशतैः शिष्यैः विश्वपर्यटनमारब्धवान्।

सम्प्रति श्रीरामकृष्णपरमहंसस्य ईश्वरतत्त्वनिरूपणविषये तेषामाभारते उपदिष्टाना- मंशानामुद्दिश्य विचारोऽत्र कर्तुं प्रयतामहे। विवेकानन्देनाप्याचार्यस्य श्रीरामकृष्णाभिप्रायानेव व्यक्तीकरणं कथं चकार इति विषये किञ्चिदवलोकयामः।

**श्रीरामकृष्णपरमहंसस्य विषये ईश्वरतत्त्वम्**

एकदा भगवान् श्रीरामकृष्णमहोदयः ब्राह्संस्जसंस्थायां एकः भक्तः तं प्रति ईश्वर -तत्त्व स्वरूपनिरूपणे किमीश्वरः साकारः निराकार इति पप्रच्छ। तदानीं श्रीरामकृष्ण -परमहंसस्य समाधानरूपोऽयमुपन्यासः। सः भगवान् श्रीरामकृष्णः ईश्वरतत्त्वनिरूपणे अधिकाधिकं श्रीमद्भगवद्गीताग्रन्थमेवं प्रामाण्येन जग्राह। श्रीरामकृष्णः निजोपदेशानधिकाधिकं बेङ्गालभाषायां गानरूपेणेवोपदिष्टवान्। तत्सम्बन्धिकामंशा एवात्र प्रस्तौष्यन्ते।

ईश्वरः साकारः निराकारच। भगवद्विषये भक्तिः प्रीतिर्वा भवेत्तस्य विषये परमात्मा साकारवान्। किन्तु तद्विपरीतानां नाम जगन्मिथ्यात्ववादिनां विषये निकाराकरः। कुत इति चेत् **यतो वाचो निवर्तन्ते अप्राप्य मनसा सह (तै.उ.)** इति तैत्तिरीयोपनिषद्युक्तदिशा ईश्वरविषये वेद न समर्थ किमस्मत्सदृशा शक्नुम इत्यूचुः। यस्य ईश्वरविषयसन्देहः भवति सः **नेति नेति (छा.उ.) इति छन्दोग्योपनिषद्युक्तदिशा इदमीश्वतत्त्वं नास्ति इदमीश्वतत्त्वं नास्तीत्येव विचारयति। तादृशस्य जगन्मिथ्या अहमपि मिथ्या स्वप्नवदिति भाति। यथात्म्यज्ञानी तु ईश्वरमनन्तसच्चिदानन्तशुद्धस्वरूपवानिति विश्वसति। अयं चेश्वरश्वः शीलसमुद्रतुल्यः। तस्मिन् समुद्रे जीवानां भक्तिरूपं हिमं किञ्चित्कालमेव घनीभूय विद्यते। योग्येनाचार्यानुग्रहेण तस्योपदेशैश्च यथार्थज्ञानरूपप्रचण्डसूर्यकिरणप्रसारणेन हिममनु-ग्रहजल - रूपेण परिणम्य ईश्वररूपे समुद्रे लयमेष्यति। अतः साकाररूपभगवानेव भक्तेनाराध्य इत्यूचुः। अहङ्कारनाशे ईश्वरभक्तिर्जायते। यथा लवणनिर्मितप्रतिमा समुद्रे पारं गच्छति समुद्रे एव लया भवेत्तथैव परिपूर्णज्ञानिनः लक्षणमप्यिदमेवेति बोध्यम्। सम्पूर्णज्ञानसिध्यनन्तरमेव नरः कुतर्कादीन्निरस्य परिपूर्णे ईश्वरतत्त्वे मनः लयमेष्यति। यथा एकस्मिन् बृहद्पात्रे जलपूरणस्थितौ पात्राच्छब्दो आयाति। किन्तु पात्रे जलपूरणानन्तरं शब्दं नैव भवेत्तथैव मनोऽहङ्कारः निर्गच्छति समनन्तरमेव ईश्वरसिद्धिर्भविष्यतीत्यत्र सन्देहो नास्त्येव। योग्यस्य नरस्य कृते भगवानेव मनुष्यरूपेणावश्यं दर्शनमनुगृह्णाति। सः ईश्वरः सर्वनियामकः, सर्वेश्वरः, सर्वशक्तियुक्तः, सृष्टिस्थितिलयकारकश्चेति ज्ञातव्यः। तादृशः**

**अनवररभक्त्या एव साध्यः। अत एव सः भगवान् स्वयमुक्तवान् गीतायाम्-**

**भक्त्यात्वनन्यया शक्यः अहमेवं विधोऽर्जुन।**

**ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप।। इति।**

ईश्वरानुग्रहार्थं लोकाः कियन्त मानवाः यतन्त इत्यत्र श्रीरामकृष्णस्वामिनः समाधानमिदम्। लोके जानाः दारापुत्रादीनां श्रीः सम्पदां प्राप्त्यर्थं सर्वथा यतन्ते तेषामलाभे विलपन्ति च। किन्तु भगवतः सिध्यर्थं न कोऽपि तथा करोति। यथा शिशुः कन्दुकादिभिः क्रीड¬माने सति मातरं विस्मरति। किन्तु तस्य यथा क्रीडायामरुचिर्जायते तदा मात्रे रुदति। तथैव जीवोऽपि लोकेऽस्मिन्नल्पषु विषयेष्वनुरक्तो भवेत, अन्ते सुकृतविशेषेण ईस्वरानुग्रहार्थं प्रयतते।

भगवत्स्वरूपं यद्येकमेव भवेत्तर्हि ईश्वरनानात्वं कथं घटत इति चेद्रामकृष्णमहोदय -स्योत्तरमिदम्। बहुरूपी (ऊसरवेल्लि) इति पक्षिविशेषं दृष्ट्वा यथा प्रत्येकः नरः तस्मिन् पक्षिविशेषे विद्यामानां कृष्णश्वेतरक्तहरितपीतादिवर्णभेदेन भावयति तथैवेश्वरोऽपि दृश्यत इत्यर्थः। अयमेव विषय- गीतायाम्-

**ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्।**

**मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः।।** इति।

**अत्यन्तभक्तियुक्तायाञ्जनेयाय ईश्वरः श्रीरामचन्द्रप्रभुरूपेण दर्शनमदर्शयदिति प्रकृष्टो –**

**दाहरणम्। वेदान्तविचारे रूपविशेषाः प्रायशः नैव भवेयुः। यावत्पर्यन्तं ब्राह्र जगन्मिथ्या**

अहङ्कारादिभिः भवेतां तावता ईश्वरः व्यक्तिरूपेणाभासते। समुद्राकाशौ दूरतो दर्शनेन नीलवर्णे दृश्येते। किन्तु समीपदर्शनेन विवणोऽभासत इति। एवं भक्तिभावना सत्यां सर्वमपि सत्यत्वेनावभासते। तदभावे वैपरीत्यमेव बोध्यते। भगवान् श्रीकृष्णः-

**यस्मात्मरतिरेव स्यादात्मतृप्तश्च मानवः।**

**आत्मन्येनैव च सन्तुष्ट तस्य कार्यं न विद्यते।। इति प्रोवाच खलु।**

**परंसंहः परमयोगी श्रीरामकृष्णः ईश्वरदर्शनलक्षणानां विषये एवमपुपदिदेश।**

ब्रह्मवादिनः वेदेषु ईश्वरस्य नानाविधिनां स्थितीनां दर्शनं चक्रुः। दुर्लभेऽस्मिन् ज्ञानमार्गे कामिनीकाञ्चनयो- वैमुख्यमाचरेत्। वस्तुतः हीने कलियुगे मार्गोऽयं नैव सुकरः। सन्दर्भेऽस्मिन् वेदे सप्तभूमयः ये मनो सम्बन्धिनः भवन्ति ते प्रत्यपादयन्। तेषु शरीरे त्रिषु निम्मस्थानेषु मनसः स्थिते सति कामिनीकाञ्चनगृहक्षेत्रादीनां विषये आशापाशा अभिवृद्धि यास्यन्ति। किन्तु ऊध्र्वदृष्टयावलोकनेन चतुर्थ्यां ह्यदयभूमौ स्थाने वा मनसः स्थापनेन ईश्वरज्योतिर्दर्शनेनात्मसम्बन्धिनं चातन्यं सिध्यति। ततः पञ्चमभूमौ कण्ठस्थाने मनसः संस्थापनेन अविद्यादयः समूलं नश्यन्ति। तदा ईश्वरप्रसङ्ग एव रोचते न तु विषयान्तरेषु। षष्ठः भूमिः मन- भवेत्। स्थितावस्मिन् भ्रुवेर्मध्ये सर्वकालसर्वावस्थासु एकाग्रतया ध्यायेत तदा निरुपमानभूतमीश्वरतत्त्वं प्रत्यक्षीयते। यथा दण्डदीपे वर्तिनं नैव स्प्रष्टुं शक्यते तथैवास्य रूपस्य स्पर्शा न कर्तव्या। अन्तिमे सप्तमभूम्यै शिरसि मनसः स्थापने प्रत्यक्षरूपेण ब्राह्नसाक्षात्कारः सिध्यति। किन्तु अस्यां दशायां शरीरस्यास्थित्वमेव वर्तते। तादृशः नरः सर्वकालसर्वावस्थासु आत्मगुणाष्टकाविर्भावेन प्रकाशति। अयमेव हि यथार्थतया ब्रह्मज्ञानिनः स्थितिरिति श्रीरामकृष्टस्य भावना।

श्रीरामकृष्णस्याभिप्रायानुसारं संस्थारे यो भगवन्तं सर्वदा ध्यायति स एव पराक्रमशाली इति कथ्यते। संसारेऽस्मिन् कामाद्यरिषड्वर्गसदृशैः क्रूरमृगैः नाराः पीड¬न्ते स्म। किन्तु संसाररूपं महत्तरं पर्वतविशेषं शिरसिधार्य क्रियामाणानां वर्माश्रमाचारोपयुक्तानां विधीनां ऋजुमार्गेण नीतिबुध्या च यो निर्वहति सोऽवश्यं भगवदनुग्रहपात्रो भवेदिति रामकृष्णस्या -भिप्रायः।

एवमेव क्षीरं दधिवत् परिणमति। घनीभूतः दधिः माधुर्यः भवति। तमेव दधिं सम्यक् मथनेन नवनीतः सारतमः पदार्थो उत्पद्यते। एकस्मिन् जलपात्रे नवनूतं कन्दुकरूपेण कृत्वा जलपात्रे संस्थापिते सति नवनीतं नैव सिञ्चति अपि च जले ऊध्र्वमुखं तिष्ठति। एवमेव लोके सर्वेषां जानानां कृते भक्तिः सिध्यत्येव। किन्तु या भक्तिः सार्वकालीना भवति सा वैराग्यरूपेण परिणमय्य प्रापञ्चिकविषयेभ्यः घनीभूय मधुरभक्तिरिव परिणमति।सापि मधुरभक्तिः ब्रह्मज्ञानेन मन्थनीभूय परब्राह्मानुभवरूपनवनीतवत्प-रिणमति। अत एव ब्रह्मवेद ब्रह्मैव भवति इत्युपनिषद्वाक्यानुसारं ब्रहमज्ञानपरायणः भक्तः ब्राह्मणमाप्नोतीति श्रीरामकृष्णपरम-हंसमहर्षिः ईश्वरतत्त्वं सुष्ठु न्यरूपि।

**श्रीविवेकानन्दस्याभिप्राये ईश्वरतत्त्वम्**

स्वामीविवेकानन्दः ईश्वरतत्त्वनिरूपणे आचार्यं रामकृष्णमेव प्रामाण्यं स्वीचकार। तथापि सः विभिन्नासूपनिषत्सु ईश्वरलक्षणं न्यरूपि। व्यासमहर्षिणा प्रणीतेषु ब्राह्मसूत्रेषु द्वितीये जन्माद्यस्य यतः इत्यस्मिन् सूत्रे निखिलानां चेतनाचेतनानां सृष्टिस्थितिलयाः येन निर्वाह्नन्ते स एव ईश्वरशब्दवाच्य इत्यवोचत्। तत्रापि श्रीभाष्ये भगवद्रामानुजाचार्यैः प्रतिपादितः विषयः

विवेकानन्दोऽपि उट्टङ्कितः। यथा यतो वा इमानि भूतानि येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्मेति ब्राह्मशब्दवाच्यं यद्वस्तु विद्यते तदेव ईश्वरशब्दवाच्य इत्यपि तेन प्रत्यपादि। विवेकान्दस्याभिप्रायानुसारं सः ईश्वररः नित्यः, शुद्धः, सर्वशक्तियुक्तः, सर्वज्ञः, सर्वेश्वरः, अपरिमितकृ-पालुः, आचार्याणामप्याचार्यः इति पर्रसिद्धः। एतानि लक्षणानि सगुणब्राह्मणि स्वरूपनिरूपकानि। तर्हि निर्गुणरूपेण ब्रह्माणि कि पार्थक्यं दृश्यत इति चेत्तत्र विवेकानन्दस्य समाधानमिदं यत् सगुणनिर्गुणयो- रभेदः द्योत एव। यतो हि यो  नरः परब्राह्मणि रतो भूत्वा शब्दस्पर्शादिविषयेषु निस्पृहया वैराग्यभावेन च भवेत्तस्य सगुणब्राह्मज्ञानं सिध्यति किन्तु यो तद्वैपरीत्येन भवेत्तस्य निर्गुणब्राह्मज्ञानं भवेदिति सारांशः। स्वामी विवेकानन्दः पुनः ब्रह्मसूत्रेषु जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च इत्यस्मिन् विषयप्रस्तावे मुक्तजीवानामनन्तशक्तिरस्तीति सापि शक्तिः ब्राह्मण अपेक्षया न्यूनमेवेति एवं सृष्टिस्थितिसंहाररूपशक्तिस्तु परमेश्वरस्य सहजक्षण - मिति उपन्यस्तः। सूत्रस्यास्य व्याख्यानावसरे त्रिमाताचार्याणां व्याख्यानानि विवेकानन्देनाव - लोकितानि। तथापि विशेषतया अमरिकादेशस्थ ह्रूटन्नगरे वेदान्तोपन्यासे श्रीमद्रामानुजा -चार्याणां व्याख्यानप्रस्तावः विवेकानन्दमहोदयेन पृथक्तया प्रस्तावितं दृश्यते। सन्दर्भेऽस्मिन् भाष्यकाराः असाधारणशक्तियुक्तस्य परमेश्वरस्य जगत्सृष्टिस्थितिलयरूपकर्माणि, सर्वेश्वरत्व- मिति मुक्त्यैश्वर्येऽन्त-र्भवन्ति उत परमेश्वरसाक्षात्कार एवैश्वर्यं वा इत्यत्र निरञ्जनः परं साम्यमुपैति इत्युपनिषद्वाक्ये असाधारणशक्तिविशिष्टस्य परमा-त्मनः जगत्सृष्टयादिधर्माः,  परमात्मना सह परमसाम्यापत्तिः सत्यसंकल्पमिति वा साधारणशक्ति- मात्रस्य मुक्तस्य नैव सम्भवन्ति। इत्येवं रूपेण विवेकानन्दमहर्षिः ईश्वरो नाम ईशावास्यमिदं सर्वमिति ईशोपनिषदि निरूपित भगवत्स्वरूपमेव निरूपयामास।